पंचमहाभूतेभ्यः शुक्रार्तवयोरुत्पत्तिः, स्वरुपं च, शुद्धाशुद्ध-शुक्रार्तवलक्षणम् गर्भावक्रमण-प्रक्रिया। गर्भोत्पत्ति विषयकाणि मतान्तराणि। गर्भिणी लक्षणानि, पुंसवनम्। प्रथमा दिमास-भेदेन गर्भशरीर विज्ञानम्। पुंस्त्रीगर्भलक्षणम् अपराणिनिर्माणं स्वरुपंच। गर्भपोषणक्रमः। गर्भस्य पितृमातृरसात्मसत्वसात्म्यजानि लक्षणानि। दौहृदलक्षणानि। तेषां महत्वम्। मा सि मा सि गर्भस्यअंगोपांग-निवृत्तिः, गर्भशय्यायाम् गर्भस्थितिस्वरुपवर्णनम्। उल्वजरायुगर्भोदकानाम स्वरुपम् आसन्नप्रसवा लक्षणम्

**(२) शरीरवर्णनम्**

शरीरशब्दव्यपदेश्यकथनम्। शरीरस्य षडङ्गत्वम्। पार्थिवादिभेदेन शरीरांगविभागः दशप्राणायतनानि, द्वादशप्राणनिरुपणम्।

त्वग्विज्ञानम्.—त्वक्स्वरुपकार्यप्रमाणादिवर्णनम्। त्वगधिष्ठिता रोगाः। केश-श्मश्रुलोमनखानां सामान्यं वर्णनम्।

पेशी विज्ञानम्.—पेशीनां संस्थानस्थानस्वरुपकार्यादिवर्णनम्। स्थानवशान्नानारुपत्वम् पेशीनाम्। सेवनीमांसरज्जु-जाल-कूर्चानां वर्णनम्। पेशी संख्याकरणम्। विशिष्टपेशी-विशेष परिचयः,

स्नायुविज्ञानम्.—स्नायूनां स्वरुपकार्यादिवर्णनम् विस्तरेण। तेषां चतुर्विधत्वम्। शल्यतंत्रे स्नायुवर्णनस्य महत्वम्, रसायनीवर्णनम्,

अस्थिविज्ञानम्.—अस्थ्नां संख्यानम्। वेदवादिनां तथा शल्यतंत्रवादिनां च मतेन अस्थि-संख्या, अस्थ्नां पंचविधभेदानां वर्णनम्। अस्थिस्वरुपकार्यादि विवरणम् अस्थिसंघाताः अस्थिवा-य्वाश्रयाश्रयीभावत्वम्।

विशेष वर्णनम् :—

अधः शाखास्थि—पादांगुल्यस्थीनि, पादतलास्थीनि (शलाकाः), पादकूर्चास्थीनि गुल्फास्थि, पार्ष्ण्यस्थि, अंतर्जङ्घास्थि, बहिर्जङ्घास्थि, जान्वस्थि, उर्वस्थि, श्रोण्यां अस्थि-पंचकम् (गुदस्थि, त्रिकास्थि, भगास्थि, द्वे नितम्बास्थिनी) ऊर्ध्वशाखास्थि—कराङ्गुल्यस्थीनि, करतलास्थीनि, करकूर्चास्थीनि, अन्तः प्रकोष्ठास्थि, बहिः प्रकोष्ठास्थि, प्रगण्डास्थि, अंसफलका-

स्थि, अक्षकास्थि। उरः पंजरास्थि—उरः फलकम् (ग्रैवेयकम, मध्यफलम्, अग्रपत्रम) पर्शुकास्थीनि पर्शुकास्थालकानि अर्बुदानि च।

पृष्ठवंशः

कशेरुकाः

ग्रीवाकशेरुकाः पृष्ठकशेरुकाः कटीकशेरुकाः

शिरोस्थीनि.—शिरः सम्पुटम्, पुरः कपालम्, पार्श्वकपालम्, पश्चिमकपालम्, शंखास्थि, जतूकास्थि, झर्झरास्थि, नासास्थि, ऊर्ध्वहन्वस्थि, अश्रुपीठास्थि, गण्डास्थि, ताल्वस्थि, शुक्ति शुक्तिकास्थि, सीरिकास्थि, अधोहन्वस्थि, कंठिकास्थि, करोटिभूमिः (करोटितलम्, करोटिपीठम्) करोटिपक्षौ करोटित्वाचभागाः। नेत्रगुहा-नासा गुहा वक्त्रगुहा इत्येतेषां विवरणम्।

संधिविज्ञानम्.—अस्थ्याश्रितसंधिकथनम्। सन्धिद्वैविध्यम्, चेष्टावन्तः स्थिराश्च संधीनां अष्टौभेदाः तेषां विस्तरेण वर्णनम्। पेश्याश्रितसंधीनां असंख्येयत्वम्। अस्थिसंधि संख्याकरणम् अंस-कूर्पर-मणिवन्ध-वंक्षण-जानु-गुल्फादि संधीनां सामान्यं वर्णनम्। श्लेषक कफ वर्णनम्।

सिराविज्ञानम्.—सिराशब्दस्य व्याख्या। सिरासंख्यानं तासां उत्पत्तिस्थानवर्णनम् सिराणां प्राणानां च आधाराधेयत्वम्। सिराणांवातादिवहानां संख्या। वातादिवहसिरासु वातादीन प्राकृतं वैकृतं च कर्म। सिराणां सर्ववहत्वप्रतिपादनम्। सिरावर्णविभक्तिकथनम्। अव्यध्यानां सिराणां संक्षेपेण कथनम्। अव्यध्यानां सिराणां प्रत्यंगं विस्तरेण वर्णनम्। वाह्यसिरापरिचया

आभ्यंतर सिरा.—शिरोभ्यन्तरीयाः, सिरासिरतः सिराकुल्याश्च-अनुमन्या सिरा अधिमन्या सिरा, गलूमूलिका सिरा, उत्तरा महासिरा—फुप्फुसीयाः सिराः हार्दिक्यः सिराः, हार्दिकी मल सिरा, अधिश्रोणिका वाह्या, अधिश्रोणिका आभ्यंतरी अधिश्रोणिके साधारण्यौ,—अधरा महा सिरा,—प्रतिहारिणी सिरा,—इत्येतेषां सामान्यं वर्णनम्।

धमनी विज्ञानम्—धमनी शब्दस्य व्याख्या पर्यायशब्दाश्च। धमनीनां संख्या स्वरुपादि वर्णनम्। प्राणौजोमनोरसादीनां धमनीभ्यो वहनम्। हृदयधमन्योः आश्रयाश्रयीभावत्वम्। धमनीनां त्रिविधत्वम्। ऊर्ध्वगानां—अधोगानां—तिर्यग्गानां च धमनीनां कार्याणि। सिराभ्यो अन्या एव धमन्यः स्रोतांसि च।

फुप्फुसाभिगा धमनी—महाधमनी—शाखाप्रविभागसहिता—महामातृका धमनी—वहिर्मातृका अन्तर्मातृका अक्षधरा—अन्तस्तनिका—अधिश्रोणिके, साधारण्यौ—अधिश्रोणिका वाह्या—अधिश्रोणिके आभ्यन्तरी-औवीं उरुजानुपृष्ठीका—पुरोजंघिका—पश्चिमजंघिका पादपृष्ठिका—पादतलीया आन्तरी वाह्याच। पादतलधानुषी—कक्षाधरा—वाह्वी—वहिःप्रकोष्ठीया—करतलधानुषी उताना गम्भीरा च करपृष्ठीया धमन्यः इत्येतासां धमनीनां सामान्यं वर्णनम्।

स्त्रोतो विज्ञानम्.—स्त्रोतस् शब्दस्य व्याख्या। स्रोतसां संख्यास्वरुपादिवर्णनम्। स्रोतसां कतिचित् प्रकाराः कर्माणि च। स्रोतोदुष्टिकारणम्-विध्दलक्षणम् दुष्टिलक्षणानां वर्णनम्। शरीररोगे स्रोतो विकारकारणतत्वम्। वहिस्स्रोतसां सामान्यं वर्णनम्।

मर्मविज्ञानम्.—मर्मशब्दस्य व्याख्या, मर्मणाँ संख्यास्वरुपादिवर्णनम्। मांसादिभेदेन मर्मसंख्या शाखाद्याश्रितमर्मणां संख्या। शाखादिषु संख्यया विभक्तानां मर्मणां नामानि। मर्मणां सद्यःप्राणहरादि पंच भेदाः। मर्मणां सद्यःप्राणहरादि कर्मविशेषाः कथं भवन्ति। मर्मोपघातसामान्यलक्षणानां सद्यः प्राणहरादिपंचविधमर्मभेदाद् विशेषलक्षणानां च वर्णनम्, शाखादि

गतानां मर्मणां प्रत्येकशः संस्थानस्थानविभागा विज्ञानं—मतान्तरप्रतिपादनम् विद्धलक्षण-पूर्वकम्। सर्वेषां मर्मणां संक्षेपेण मानकथनम्। मर्मणां मानकथनप्रयोजनम्। मर्मविज्ञानस्य शल्यतंत्रे महत्वम्। मर्मवेधजविकारप्रतिकारः चेतनानिवध्दवैशिष्टयात् त्रिमर्मणाम् मुख्यत्वं मर्मजातशरस्यविकाराःकृच्छ्तमाः।

अवयवविज्ञानम्—आशयशब्दस्य व्याख्या। आशयवर्णनम् मतान्तरवर्णनपुरःसरम् आशयानां दोषाणां च आश्रयाश्रयीभावत्वम्।

कोष्ठशब्दस्य व्याख्या। अन्यमतेन कोष्ठः, महास्रोतः उच्यते। विस्तरेण महास्रोतोवर्णनम्। कोष्ठांगानां विज्ञानम्। हृदयं, क्लोम, फुप्फुसं, यकृत्, प्लीहा, उन्दुकम्, वृक्कौ, नाभिः डिम्बः, अन्त्रम्, वस्तिः, इत्येतेषां सम्यक् विज्ञानम्। हृदयस्य तु सविशेषं विज्ञानम्। चेतनास्थान-विवेकः आज्ञाचक्र वर्णनम्। मस्तुलुंगपरिज्ञानम्। मस्तिष्कनिवद्धा नाड्यः। मनोवहस्रोतो वर्णनम्, षट्चक्र-परिचयः। सुषुम्नाकाण्डस्य सामान्यवर्णनम्। सुषुम्नस्नायुकाण्डनिबद्धाः नाड्यः, इडापिंगला शाखा प्रशाखावर्णनम्।

(3) मनोविज्ञानम्.—मनसो अन्नमयत्वम् 'मनस्करं पयः' मनसः स्वरुपम्। अणुत्वैकत्वा दिज्ञानकर्मेन्द्रियत्वं च। मनसः स्थानम् संज्ञावहस्रोतांसि च। चिन्त्यविचार्यादयः पंच मनोविषयाः मनसः कार्यसंकल्पः इन्द्रियाभिग्रहश्च। आत्मा मनसश्चेतयिता, सुखदुःखभोक्ता च आत्मेन्द्रिंमनोर्थानां संनिकर्षेण ज्ञानम् जन्यते तदभावेऽज्ञानम्। मनसि तमः प्रविष्टे निद्रा जायते। नातिप्रसुप्तः पुरुषः दोषपूर्णेषु मनोवहस्रोतःसु स्वप्नान् पश्यति। बहिरिन्द्रियगृहीतविषयान् प्राणवायुः धमनीभिः मनो नयति, प्राण एव बुद्धीन्द्रियचित्तधृक्। तेषां बलदायकः। हृदये स्थितं साधकं पित्तं, अधिप्रेरिताः उदानव्यानादिवायवः बहिरिन्द्रियाणि प्रेरयन्ति। बुद्धिः मनः सहकारिणी, सारासारविवेककारिणी च। मनसः रजस्तमश्च द्वौ दौषौ शारीरा वातपितकफास्त्रयाः एवं पंच दोषाः, मनः प्रतिशरीरं भिन्नम्। निद्रा विवेकः, मूर्च्छावस्थाविवेकः। प्राणादि पंचकस्य मनसा प्रेरितत्वम् स्त्रवंतपरतंत्र चेष्टाविवेकः।

—पंच ज्ञानेन्द्रियाणि—

(अ) इन्द्रियोत्पत्तिः पोषणं च.—पंचमहाभूतेभ्यः पंचज्ञानेन्द्रियाणामुत्पत्तिः। एकेन इन्द्रियेण एक एव विषयः गृह्यते। न ह्यन्येन ह्यन्यः। तुल्ययोनित्वात् स्वजनकभूतगुणः ह्येव इन्द्रियेण गृह्यते। ज्ञानेन्द्रियाणि सूक्ष्माणि ह्यतीन्द्रियाणि च। इन्द्रियाणां धारकः प्राणवायुः। शिरस्थः तर्पकः कफः अक्षतर्पणः।

(आ) श्रोत्रेन्द्रियम् (कर्णौ).—कर्णविवरवर्तिनः आकाशस्य श्रोत्रत्वम्। शब्दवहे धमन्यौ वीचीतरंगन्यायेन दूरोत्पन्नो हि शब्दः श्रोत्रेण ज्ञायते। शब्दवाहको वायुः प्राणः। शब्दग्राहकं मनः। कर्णेन्द्रिय-विवेकः।

(ई) स्पर्शनेन्द्रियम् (त्वक्) त्वक्स्थं स्पर्शनेन्द्रियम्। स्पर्शवहा धमन्यः स्पर्शवाहको वायुः प्राणः। मनः स्पर्शग्राहकम्। स्पर्शप्रकाराः खरादिउष्णशीतादि-द्रवादि-चलादिका। स्पर्शनेन्द्रियं सर्वशरीरवर्ति, सर्वेन्द्रियाणां अभिव्यापकम् च। त्वचि भ्राजकपित्तविवेकः। स्वेदमार्गाः।

(ई) चक्षुः (रूपेन्द्रियम्).—नेत्रयोः कृष्णताराग्रवर्ति चक्षुरिन्द्रियम्। आलोकसहकृतस्यैव चक्षुषः रुपादिग्राहकत्वम्। चक्षुषि आलोचकं पित्तं, रुपग्रहणेसाहाय्यं करोति रुपवाहकः वायुः। मनः रूपग्राहकम् रुपवहे धमन्यौ। चक्षुःस्थाने निमेषोन्मेषणादिक्रियाः व्यानवायुः करोति।

रुप प्रकाराः सप्त शुक्लकृष्णादयः। परिमाणस्निग्धत्वादिगुणाः संख्या च रूपग्राह्याः। आकृति वर्णयोर्भेदः वर्णज्ञानम्, छाया ज्ञानम्, प्रमाज्ञानम्।

(उ) रसनेंद्रियम् (रसना).—जिह्वाग्रवर्ति रसनेन्द्रियम्। रसवहे धमन्यौ। रसवाहकः प्राणवायुः, रसग्राहकं मनः। रसग्रहणे बोधककफः, रसनायाः सहायकः। रसप्रकारकः मधुराम्ला-दयः षट्। क्षारादि-विविध-रसभेदानां ज्ञानम् रसाज्ञानजनको विवेकः।

(ऊ) गन्धेन्द्रियम् (घ्राणम्).—नासिकायां गन्धेन्द्रियं घ्राणं नाम। गन्धवहे धमन्यौ। गन्धवाहकः प्राणवायुः। गन्धवाहकं मनः। सुगन्धदुर्गन्धभेदात् द्विविधो गन्धः। विविध गन्धभेदग्रहः गन्धज्ञानविवेकः।

ग्रन्थांशाः।

वाग्भट :—शारीरस्थानम् अ०—1, 2, 3, 4, 5।

चरकः—सूत्रस्थानम् अ०—8–11। शारीरस्थानम्, अ० 1, 2, 3, 4, 5, 6, 7, 8

सुश्रुत :—शारीरस्थानं—संपूर्णम्। गुरूपदेशाश्च।

# (२) दोषधातुमलविज्ञानम्

## (1) दोषादीनाम् स्वरुपादि विज्ञानम्

1. (1) दोषाणां स्वरुपम् (2) दोषधातुमलाश्रयस्य लक्षणम् (3) लोक पुरुषयोः साम्यम: (4) पंचमहाभूतानां पुरुषसमाश्रयः (5) पंचमहाभूतेभ्यश्चचेतनाधिष्ठितेभ्यो दोषधातु मलानामुत्पत्तिः। (6) मनसः पंचेन्द्रियाणां च भौतिकत्वं (7) सुखदुःखानुभवो मनः सहायेनैव आत्मनः। (8) दोषधातुमला एवस्थूलशरीरघटकाः (मूलं)।
2. दोषधातुमलानां गुणतो विज्ञानम् स्वरुपतश्च
3. दोषधातुमलानां गुणतो विज्ञानम् स्वरुपतश्च
4. दोषाणां स्थानानि संचयस्थानानि च
5. दोषाणां क्रियाकरत्वम् क्रिया प्रतिरोधश्च
6. वातादीनां सामान्यकर्माणि विशिष्टानि च
7. स्थानभेदानुसारं कर्मविशेषाः।
8. दोषधातुमलानां वृद्धिलक्षणानि संचयहेतवश्च
9. दोषधातुमलानाम् क्षयलक्षणानि क्षयहेतवश्च
10. दोषाणां प्रकोपलक्षणानि उन्मार्गगामिता च
11. दोषाणां विकारकर्तृत्वम् उपादानरूपं नैमित्तिकं च,
12. दोषभेदानुसारेण विकृतिभेदाः
13. दोषाणां शरीरक्रियाणां च संबंधः शरीरतंत्रयंत्राणां कर्मणि च
14. दोषाणां औषधगुणानां, च संबंधः औषधप्रसर सम्प्राप्तिः भेदाश्च
15. दोषाणां व्याध्यवस्थाजनकत्वम् सम्प्राप्ति परिहारोपायज्ञानम्
16. चिकित्सायां दोषसंबंधः दोषजन्यसम्प्राप्तिपरिहारोपायज्ञानम्
17. दोषाणां वृद्धिक्षयकरा हेतवः वृद्धिक्षयकरत्वे तत्तद्द्रव्यप्रभावसम्प्राप्तिः
18. दोषज्ञानम् स्वस्थानुरहितवर्णने सौकर्यम् तस्य लाभाश्च।
19. संसर्गसंनिपातादिप्रकारेण दोषाणां विस्तरः। शरीरोपादान कोषाणुपर्यंतम् दोषव्याप्तिश्च॥

## (2) शरीरस्थवायोः कार्याणि- प्राणवायोः कर्माणि

1. उच्छ्वासनिश्वासकार्यम्। स्थानम् तदुपरिमनसो नियंत्रणम् प्राणायाम प्रकाराः
2. नासातः हृदयपर्यंतं प्राणवायोः संचारः। प्राणवहस्रोतोवर्णनं च।
3. नासा गलफुस्फुसगतः प्राणसंचारमार्गः क्रमेण। फौप्फुस विशिष्ट परिचयश्च।
4. प्राणवायोर्विविधं स्वरुपम् कर्म मार्गश्च। प्राणनक्रिया विवेकश्च
5. अंबरपीयूषेण प्राणः जीवितरक्षणं करोति। अम्बर पीयूष विशेष वर्णनंच।
6. प्राणवायोर्विविधं स्वरुपम् कर्म मार्गश्च। प्राणनक्रिया विवेकश्च
7. प्राणवहस्रोतसां मूलं हृदयं धमन्यश्च। महास्रोतश्च प्राणवहानां मूलमिति चरकः
8. नाभितः शिरः पर्यन्तं प्राणस्य संचारः, अन्नप्रवेशादि कार्याणि
9. प्राणवरोधान्मरणम्। विकृत्या श्वासकासादिरोगाः। प्राणवाय्वावरणम् विशेष परिचयः

10. प्राणवायुना हृदयधारणं। रक्तशुद्धिः। जीवनीयता प्राणस्य उदानस्य कर्माणि (वागिन्द्रियं जिह्वा च)
  1. नाभितः प्रवृत्तः उदानः, वाक्प्रवर्तकः।
  2. शब्दवाहिनीं धमनीं प्राप्य उदानः शब्दं करोति। शब्दस्य कदम्बगोलकन्यायेन प्रसरः
  3. ध्वन्यात्मको वर्णात्मकश्च शब्दः। पाणिनीयशिक्षातः शब्दोत्पत्तिप्रकारज्ञानम्,
  4. आकाशमाध्यम प्रेरको वायुः शब्दोत्पादने शब्दवाहनेच हेतुः शब्दनित्यतानित्यता च
  5. उदानप्रेरिता जिह्वा संयोगविशेषेण स्फुटाक्षरं करोति। वागिन्द्रियस्याग्नेयता विद्युता शब्दस्य-प्रचारः
  6. वलं वर्णः स्मृत्यादयश्च उदानवायुकृताः। उदानवायुकृताः अन्ये विशेषाः। उदानवायुवावरणविवेकः।

**व्यानस्य कर्माणि**

  1. हृदि स्थितः रसवहनं करोति धातुवहनमपि। व्यानविकाराः। व्यानावरणम्।
  2. स्वतंत्रपरतंत्रगमनादिचेष्टास्तदायत्ताः। शरीरयंत्राणां व्यानव्याप्तिः।

**समानस्य कर्माणि**

  1. अग्निसमीपेस्थानम्।
  2. कोष्ठसंचारः, अन्नमलविवेकः।
  3. अन्नग्रहणपचनादीनि कर्माणि। समानावरण विवेकः समान रोगाः
  1. मलमूत्रादिप्रवर्तनम् श्रोण्यादिषु संचारः। शुक्रार्तवप्रवर्तनम्, गर्भनिष्क्रमणम् धारणं च अपानावरणम् दोषेभ्योजाताः प्रकृतयः। हीनमध्योत्तमानां प्रकृतीनां लक्षणानि क्रूरमृदु-मध्यकोष्टानां दोषजन्यत्वम्। शरीरप्रमाणं, वर्ण रुचि आहारप्रमाण निद्रादिभिः प्रकृतिज्ञानम्। वात पित्त कफ-प्रकृतीनां पुरुषाणां लक्षणानि।

**(3) शरीरपोषणम् (अन्नस्य पचनम्)—दोषैः शरीरपोषणम्**

पचनं नाम आहारगुणानां शरीरगुणभावमापन्नत्वम्।

(अ) 1. पंचभूतात्मके देहे आहारः पंचभौतिको भवति।
  2. सर्वमेव द्रव्यं पांचभौतिकं—द्विधा, सेंद्रियं, निरीन्द्रियं च।
  3. आहार द्रव्याणि प्रायः सेन्द्रियाणि।
  4. उत्पत्तितः जंगम औद्भिदपार्थिवभदेन त्रिविधं द्रव्यम्।
  5. शमनकोपनस्वस्थहितमिति त्रिविधद्रव्यं, प्रायः स्वस्थहितद्रव्यस्य आहारत्वम्।
  6. पार्थिव-आप्यतैजसवायवीयनाभसद्रव्याणां गुणकर्माणि।

(आ) 7. मुखादारम्य आमपक्वाशयसहितः पाचनमार्गः महास्रोतः तत्स्वरूपवर्णनम् क्लोम्नश्च।
  8. मुखेन अन्नस्य ग्रहणं, दन्तैः जर्जरीकरणं च।
  9. मुखस्य बोधककफेन अन्नरसग्रहणं घ्राणेन गंधग्रहणं च। गिलनिका परिचयः।
  10. मुखतः गलमार्गेणवायुः अन्नमामाशय अपकर्षति। गिलनिकाकर्माणि पेशीचेष्टाः।
  11. आमाशये क्लेदककफेन अन्नस्य क्लिन्नता भवति। आमाशयस्थं पित्तं रंजकमिति-वाग्भटः।
  12. ग्रहण्याश्रितेन अग्निना पित्तस्वरूपेण अन्नस्य पाचनम्।
  13. अन्नपचने मधुराम्लकटुरूपास्त्रय अवस्थापाकाः क्रमेण भवंति तत्र पराशरादिमतम्।

14. अन्नगतदोषाणां पाचनं, पुरीषादिकिट्टस्य पृथक्करणम् सारभूतस्य आहाररसस्य उत्पत्तिः। इत्येवं त्रिविधं पचनकर्म पच्यमानाशयपक्वाशयादिषु जायते।
15. पंचभूताग्नयः स्वान् स्वान् भूतांशान् विशषेण पचंति, पंचभूताग्निविवेकः तेषांस्वरूपम् च।
16. आहाराद् दोषधातुमलानां सन्तत्या उत्पत्तिः।
17. अग्निसंधुक्षणकरः सारकिट्टविवेचकः समानवायुः पाचकरसस्रावः।
18. उण्डुकस्थ पुरीषधरा कला मलं विभजते। सारं सिराद्वारा पृथक् करोति प्रतिहारिणीसिरा शाखाभिः।
19. अपानवायुना पुरीषमूत्रमलवायूनां बहिःक्षेपणम्।
20. षड्रसात्मकस्य आहारस्य मधुराम्लकटुरुपा विपाकाः।
21. मलादिनिस्सरणे त्रिविधविपाकानां कर्मभेदः।
22. आहारपरिणामकराः अग्निवायुरित्यादिभावाः।
22. आहारपरिणामकराः अग्निवायुरित्यादिभावाः।
23. एवं पक्वादेव आहारात रसादयो धातवः संभवन्ति।
24. आहाररसः सिराभिः (प्रतिहारिणीशिराभिः) हृदयं गच्छति।
25. अंबुवाहिस्रोतोभ्यः जलं शरीरे गच्छति।
26. मूत्रोत्पत्तिः, मूत्रवहस्रोतांसि, मूत्रस्यक्लेदवाहनं कर्म, गवीनिपरिचयः, गवीन्यंत्र परिचये 'यदान्त्रेषु (गवीन्योः)' इतिश्रुतिः।
27. मूत्रस्य अंजलिप्रमाणम् मूत्रातिसारो मूत्राल्पता च, हेतवश्च।

(4) धातुविज्ञानम्

द्विप्रकारा धातवः मलभूताः प्रसादभूताश्च। परिणाममापद्यमानाः परिणाममापन्नाश्च तेषां स्थानानि गुणविशेषः कार्यविशेषश्च, तयोः परस्परसंबंधः धातुस्रोतःसु धात्वग्निविवेकः।

आहारात् अन्नरसोत्पत्तिः आमाशये पच्यमानाशये पक्वाशयेच, प्रतिहारिणी सिराद्वारा यकृति प्रविष्टस्य रसस्य अधरया महासिरया हृदये प्रवेशः।

(1) रसधातुः

1. रसस्य हृदयाभिगनम्।
2. रसवहनाडिभिः हृदयान्निर्गताभिः व्यानवायुना रसस्य अहरहः शरीरविक्षेपणम्।
3. मिश्रितयोः रसरक्तधात्वोः हृदयात् नाड़ीभिः वहनम्।
4. रसस्य शब्दार्चिजलसंतानवत् सर्वशरीरे गमनम्।
5. रसः सिरामार्गेण हृदयं पुनरायाति।
6. रक्तमांसादि सर्वधातूनां नित्यं प्रीणनं रसधातुना भवति।
7. रसधातुना इतरधातुपोषणम् खलेकपोतन्यायेन केदारकुल्यान्यायेन सर्वात्मपरिणामरूपेण च भवति।
8. अहोरात्रात् षडहात मासेन वा रसः शुक्रान्ताद् धातून् पोषयति इति मतत्रयम्।
9. रसधातुस्वरूपम्—सौम्यः द्रवः, स्वादुः, सूक्ष्मः, विविध वर्णश्च, कपोतादिवर्णः।
10. रसधात्वग्निः आहाररसं पुनः पचति।
11. रसवहस्रोतांसि हृदयं च रसधातोः मुख्यस्थानानि। रसाग्निस्थानं रसवहस्रोतः।
12. रसधातोः अं रक्तपोषकः।

13. रसात् स्त्रीणां मासि मासि रजः प्रवर्त्तते। रसस्योपधातुः रजः, लसीका च। अपरायाः स्तनयोश्च पोषणं रजसा। शुक्ररजसोः संबंधः रसस्य मलः कफः तस्य स्थानम् रसस्य कफस्य च संबंधः।
14. रजसः रक्तवर्णत्वम्।
15. रसस्य अंजलि प्रमाणम्।

(2) रक्तधातुः

1. रसः यकृदादिस्थानेषु रंजकाग्निना रक्तत्वं प्राप्नोति। रक्तधातु बीजम्।
2. रक्तस्य वर्णः आग्नेयत्वम् पांचभौतिकगुणः।
3. रक्तस्य जीवनं कर्म। रक्तकर्मणः महत्वम्।
4. रक्तधराकलायां रक्तं, अण्वस्थिषु च सरक्त मेदः भवति तदेव रक्तधातुबीजम्।
5. रक्ताग्निना रक्तस्य मांसेपोषणस्यापि अंशाः संभवन्ति रक्तवहस्रोतांसि।
6. रक्तस्य मलंपितम् वहिर्गमनस्वरूपम्, रक्तस्कन्दता, रक्तपित्तम्।
7. रक्तस्य अंजलिप्रमाणम् रक्तदोषाः, रक्तरोगाः, रक्तप्राधान्यं, रक्तक्षयः।
8. शुद्धरक्तस्य, रक्तसारस्यच लक्षणानि।

(3) मांसधातुः—अस्य उपधातुः त्वक्, वसा, खमलाः

1. मांसधातुस्वरूपं—सार्द्रं—स्थिर—पिच्छिलाः गुणाः।
2. शरीरे पेशी स्नाय्वादिकं मांसविकारा एव सिराधमन्यादीनां मांसमयता।
3. मांसस्य लेपनं कर्म। पेशीनां संवरण कर्म स्नायुभिः भारक्षमता। मांसकोषाणवः।
4. मांसधरा कला।
5. मांसविकार पेशीस्नायु प्रभृतीनां चलत्वं वायुना भवति।
6. उत्क्षेपण—अपक्षेपणादि पंचकर्माणि मांसपेशीषु वायुनैव भवंति।
7. मांसधातुतः षटत्वचः संभवंति ताः उपधातवः।
8. त्वचो नामानि, स्थानादि च। त्वक्सारत्वम्।
9. मांसस्य मलः खेषुः मलाः।
10. मांससारस्य लक्षणानि। मांसवहस्रोतांसि, मांसाग्नि विवेकः।
11. शुद्धमांसस्य स्नेहः वसा इति नाम्ना व्यवह्रियते। सा च उपधातुस्वरूपा।

(4) मेदोधातुः स्वेदश्च

1. मेदःस्वरूपं स्निग्धं, श्वेतं, सान्द्रम् मृदुच।
2. मदोधरा कला।
3. मेदसः स्नायुसंभवः।
4. मेदसः कार्यं स्नेहः।
5. मेदसो मलः स्वेदः। तस्य स्वरूपं, पितान्वयत्वम् च मदोवहस्रोतांसि मेदसः परिपचनम्।
6. स्वेदवहस्रोतांसि। त्वचि स्वेदोद्गमः। स्वेदस्य द्वैविध्यम् अन्नमलरूपमपि स्वेदः। स्वेदस्य जलीयत्वम् च।
7. स्वेदस्य कर्म क्लेदवाहनम्। स्वेदग्रन्थिविवेकः।
8. मेदः सारलक्षणम्।

### (5) अस्थिधातुः नखरोम दन्ताश्च

1. अस्थिस्वरूपम्—स्थिरं, घनं, रुक्षं, सच्छिद्रं, शुषिरं च। अस्थि उपादानविवेक:।
2. अस्थिकार्य—धारणं। अस्थिवहस्रोतांसि। अस्थि धात्वग्निः।
3. अस्थिसारलक्षणम्।
4. अस्थ्नः मलः नखरोमकेशादि तेषां स्वरूपम्।
4. अस्थ्नः उपधातुः दंताः तेषां उद्भवपतनादि।

### (6) मज्जा-मज्जमलः अक्षिनेत्रादिस्नेहः

1. मज्जस्वरूपं-स्निग्धं। अस्थिमध्यच्छिद्रेषु भवति।
2. मेदोधराकलायाः महदस्थिषु मज्जा संभवति।
3. मज्जकार्य—अस्थिपूरणम् मज्जविकाराः।
4. मज्जसारस्य लक्षणानि।
5. मज्जमलः अक्षित्वग् विशां स्नेहः।
6. शिरःकपालेषु अंतर्मज्जा मस्तुलुंगो नाम। मस्तुलुंगस्य मज्जोपादानत्वेपि विशेष विवेकः तस्य सहस्रारचक्ररूपेण योगसम्मतं वर्णनम्।

### (7) शुक्रं आर्तवं ओजश्च

1. शुक्रस्य स्वरूपं। शुक्रधरा कला।
2. शुक्रवहस्रोतांसि। वृषणस्वरूपम्, शुक्रप्रपा, पौरुषग्रन्थिविवेकश्च।
3. शुक्रसारस्य लक्षणम्। शुक्रस्वरूपभेदाश्च।
4. शुक्रस्य लक्षणम्।
5. ओजः स्वरूपं—प्रमाणं—कार्य—महत्वं च। ओजस उपधातुता साधकपित्तमोजोग्निः
6. स्त्रीबीज—आर्तस्वरूपं स्थानं च।

### (8) स्तन्यम्

1. स्तन्यस्य स्वरूपं—स्थानं, उत्पत्तिकालः, कार्यप्रमाणं च। स्तन्यस्य उपधातुत्वम्।

ग्रथांशाः (1) चरकः सूत्रस्थानम् अ. 1, 12, 20, 28, 29।
चरकः विमानस्थानम् 1, 3, 5, 6।
चरकः शारीरस्थानम् 6।
सुश्रुतः सूत्रस्थानम् अ. 14, 15, 21।
निदानम् अ 1
शारीरम् अ 4
उत्तर० अ 66
अष्टांगहृदयम्ः सूत्रस्थानम्—अ. 1, 11, 12, 13, 14, 15।
शारीरं 1,3।
गुरूपदेशाश्च।

# दोषधातु मलविज्ञानम्–द्वितीयो विभाग :

**निदानपंचकम्**

व्याधेर्ज्ञानोपाया—हेतुलक्षणम्—हेतुप्रकाराः सन्निकृष्टादिभेदात् चतुर्विधाः, असात्म्येंद्रियार्थादिभेदात् त्रिधा। दोषव्याध्युभयभेदात् त्रिधा। उत्पादकव्यंजकभेदाद् द्विधा। बाह्याभ्यंतरभेदाद् द्विधा। दोषतः—अनुवंध्यानुवंधभेदाद् द्विधा। आशयापकर्षहेतुः। गतिभेदात् त्रिधा। प्रकृतिविकृतिभेदात् द्विधा। सामत्वनिरामत्वाभ्यां द्विधा। व्यापन्नौषधाद्युपयोगाद्रोगप्रादुर्भावः। प्राणादिस्त्रोतसां दुष्टिहेतवः।

पूर्वलक्षणम् :—सामान्यविशषभेदेन पूर्वरूपं द्विविधम्।

रूपलक्षणम् :—व्याधिरूपयोः व्यवच्छेदः।

उपशयलक्षणम् :—चिकित्सा-उपशययोः भेदः उपशयप्रकाराः '(सोदाहरणाः)।

हेतुविपरीत :—व्याधिविपरीत—हेतुव्याधिविपरीत—हेतुविपरीतार्थकारी—हेतुव्याधिविपरीतार्थकारी।

संप्राप्तिलक्षणम् :—तस्याः औपाधिका भेदाः सामान्यविशषभेदौ।

संप्राप्तिविज्ञानम् :—दोषाणां कोष्ठात् शाखादिगमनम्। शाखादिभ्यः कोष्ठाभिगमनम्—दोष—दूष्ययोराश्रयाश्रयीभावः। वृद्धः क्षीणश्च पूर्वो धातुः परं क्षपयति वर्धयति च। दोषधातुमलानां वृद्धिक्षयलक्षणानि। ओजसः तिस्रो व्यापदः। दोषाणां चयप्रकोपादि—हेतवः। दोषाणां संचयलक्षणानि। व्यापन्नेषु ऋतुषु दोषप्रकोपः। दोषाणां प्रकोपलक्षणानि। प्रसराख्य-विशेषः लक्षणानि च। स्थानसंश्रयविवरणं, पूर्वरुपोत्पादः। व्याधिक्षमशरीराणिस्रोतोवैगुण्यनिरूपणम्। स्त्रोतोदुष्टिलक्षणानि—व्याधिव्यक्तिः। दोषदूष्यसंमूर्च्छना विवरणम्। व्याधिभेदः वातादिभेदेन दूष्यभदेन वा, व्याधीनां च कार्यकारणसंबंधः। दोषलक्षणव्याधिलक्षणयोर्व्यवच्छेदः। व्याधीनां नानात्मजत्वं, सामान्यजत्वं च। चत्वारिंशत् पित्तविकाराः। अशीतिर्वातविकाराः। विंशतिः कफविकाराः, कुपितानां दोषाणां स्रंसव्यासव्यधस्वापादिकर्माणि।

निजागंत्वादिसमुत्थान—विशेषात् संप्राप्तिभेदः।

अधिष्ठानभेदेन संप्राप्तिभेदः, रसप्रदोषजाः विकाराः, रक्तप्रदोषजाः विकाराः, मांसप्रदोषजाः विकाराः, मेदःप्रदोषजाः विकाराः, अस्थिप्रदोषजाः विकाराः, मज्जाप्रदोषजाः विकाराः, शुक्रप्रदोषजाः विकाराः, इन्द्रियप्रदोषजाः विकारा, उपधातुप्रदोषजाः विकाराः, मलप्रदोषजाः विकाराः

विकारप्रकृतिनिरूपणं—

दोषमूलाः सर्वे व्याधयः, रजस्तमोमूला रोगाः, त्रयो रोगमार्गाः मार्गाश्रितरोगविशेषाः, व्याधीनां सामान्यनिरूपणम्।

लिंगत्वेनोक्तानां व्याधीनां पृथग् व्याधित्वम्—व्याध्याश्रयौ—व्याधिप्रकाराः आगंतु शारीरमानसस्वाभाविकभेदेन — आदिबलप्रवृत्तादिभेदेन — प्राकृतवैकृतभेदेन—अनुवंध्यानबंधभेदेन—संतर्पणोत्था विकाराः अपतर्पणोत्था विकाराः।

रक्तजा रोगाः, अष्टौ महागदाः—स्थौल्यकार्श्यादि अष्टौ निंदिताः देहाः।

रोगस्य निदानार्थकरत्वम्—व्याधीनां हेतुसंकरः, व्याधीनां लिंगं सांकर्यं च।

व्याधिगौरवलाघवम्—व्याधिनानात्वे हेतुः—रोगाणामसंख्येत्वम् ।

जनपदध्वंसकव्याधीनां संप्राप्तयः—

व्याधिसंसर्गहेतवः—औपसर्गिकाः रोगाः—व्याध्यवस्था विशेषाः—आमपक्वादिविनिश्चयः—सामनिरामदोषलक्षणानि, सामनिरामदूष्यलक्षणानि, सामनिराममलक्षणानि—सामनिरामव्याधिलक्षणानि ।

धातुगतत्वम्-ज्वर-कुष्ठ-वातव्याधि-मसूरिकासु, धातुगतलक्षणानि व्रणस्राव, वेदना-वर्णादिविज्ञानम्—विकृतशोणितस्य दोषभेदेन लक्षणानि —अब्धातुविकारः अतिसारउदरतृष्णादयः—वातरक्तकुष्ठयोः—उत्तानगंभीरभेदौ—ज्वरोक्तं अन्तर्वेगावस्थाबाह्यम्, दोषपाकः, धातुपाकश्च, धातुपाकलक्षणानि मेहोक्तमूत्रविकृतिविज्ञानम्, क्लेददुष्टिः ।

उपद्रवलक्षणम्

साध्यासाध्यविचारः

रिष्टलक्षणविवरणम्

क्रम्युत्पादः—बाह्याभ्यंतरादिभेदेन—विंशतिक्रमयः—तेषां विज्ञानम्, प्राकृताः क्रमयश्च चरकोक्ता रोगनिदानविषयोक्तसर्वरोगसंप्राप्तयः ।

प्रत्यक्षविषयः—दुष्टरक्तपरीक्षा—मूत्रपरीक्षा—प्रमेहोक्तगुणभदेन, दोषवर्णभदेन तैलबिंदु परीक्षया च मलपरीक्षा सामनिरामभेदेन कृमिपरीक्षा आकृत्यादिभेदेन ।

निष्ठीवनपरीक्षा, वर्णगंधादिभेदेन, गुणविशषभेदेन ।

व्रणस्रावपरीक्षा—धातुगतभेदेन—गन्धवर्ण भेदेन च ।

ग्रंथांशाः—माधवनिदानम्—निदानपंचकप्रकरणं मधुकोशटीकासहितम् ।

वाग्भटः:-सूत्रस्थानम्—अ. 10-11-12-13—निदानम्—अ. 1 ।

चरकः—निदानस्थानम्—अ. 1

सुश्रुत—सूत्रस्थानम्—अ. 15-22-30-31-33- ।

योगरत्नाकरः—अष्टविधपरीक्षाविभागः नाडीविज्ञानं कणादकृतं गंगाधर टीका समेतम् च ।

# (३) वनस्पतिपरिचय : द्रव्यगुणश्च

## व्याख्यानानि २००

## प्रात्यक्षिकाणि ७५

(1) किं नाम द्रव्यगुणशास्त्रम् ।

(2) तस्य वैद्यकशास्त्रोपकारकत्वम् पंचभौतिकद्रव्यविचार: ।

(1) प्रत्येकं द्रव्यं पांचभौतिकं सृष्टि: देहश्च ।

(2) आकाशादिभूतस्य शब्दादिक: एकैक विशेषगुण: ।

(3) आकाशाद् वायु: इत्यादि क्रमेण पृथिवीपर्यन्ता उत्पत्ति: ।

(4) एकगुणवृद्ध्यन्वय: परे, एवं पृथिव्यां शब्दादिपंचगुणा: ।

(5) पंचभूतानां पंचीकरणेन भौतिकद्रव्योत्पत्ति: ।

(6) पार्थिवद्रव्यादिसंज्ञा पृथिव्यादिभूयस्त्वेन ।

(7) पार्थिवादिद्रव्याणां गुर्वादिगुणा: ।

(8) विंशति: गुणा:, तत्रगुरुलघ्वादिद्वन्द्वानि ।

(9) वीर्यसंज्ञकागुणा: ।

(10) विपाकत्रैविध्यम् ।

(11) प्रभाव: विचित्रप्रत्ययारब्धत्वं समानप्रत्ययारब्धत्वं च ।

(12) महाभूतानां स्पर्शनेन्द्रियग्राह्यगुणा: खरद्रवादय: ।

(13) द्रव्येषु षड्रसा: भूतद्वयाधिक्येन, तेषां उत्पत्ति: ।

(14) द्रव्यस्य लक्षणम् ।

(15) द्रव्यस्य वर्गीकरणे हेतु: ।

(16) विविधदृष्ट्या वर्गीकरणम् ।

(17) कारणकार्यद्रव्यभेदेन—भूताधिक्यभेदेन—उत्पत्ति भेदेन (जंगमऔद्भिदपार्थिवादिभेदा: वनस्पतिवीरुधादि जरायुजस्वेदजादि) चेतनाचेतनभेदेन ।

(18) चिकित्सोपयोगिताभेदेन (दोषशमनधातुप्रदूषणादि) कर्मोपयोगिताभेदेन (जीवनीय-बृंहणीयादि 61 भेदा:) ।

(19) कर्मोपयोगिता भेदेन—जीवनीय— बृंहणीय — लेखनीय — भेदनीय — संधानीय — दीपनीय — पाचनीय — बल्य — वर्ण्य — कण्ठ्य — केश्य — चक्षुष्य — हृद्य — तृप्तिघ्न — विषघ्न — स्तन्यजनन — स्तन्यशोधन—शुक्रशोधन — स्नहोपग — स्वेदोपग — वमनोपग — विरचनोपग — आस्थापनोपग — अनुवासनोपग — पुरीषसंग्रहणीय — पुरीषविरजनीय — मूत्रसंग्रहणीय — मूत्रविरजनीय — मूत्र-विरेचनीय — श्रमहर — दाहप्रशमन — शीतप्रशमन — शोणितास्थापन — वेदना स्थापन — संज्ञास्थापन — प्रजास्थापन — वृष्य-वयस्थापन — रसायन — स्तंभन — ग्राही-बुद्धिवर्धक — वामक — रेचक — रोपण — व्यवायी — विकासी — भेदकारी — प्रमाथि-पुंस्त्वोपघाति — स्वप्नसंजनन — — स्वेदापनयन — विम्लापन — स्रंसन — शमन – अनुलोमन — अभिष्यंदि — शोधन — दष्टया रोगनाशनभेदेन (ज्वरहर

— कासहर — अर्शोघ्न — कुष्ठघ्न — छर्दिनिग्रहण — हिक्कानिग्रहण — तृष्णानिग्रहण — रक्तपित्तश्च — कृमिघ्न — ऊर्ध्वप्रशमन — अतिसारघ्न — इत्यादि)।

(20) सर्वद्रव्याणां उपयुक्तत्वम्।

(21) द्रव्यप्राधान्यम्।

(22) अथ गुणा :—(1) गुणसंख्या (2) वैशेषिकगुणाः (3) आत्मगुणाः (4) सामान्यगुणाः (परापरत्वादयः) (5) विंशतिर्गुणाः, गुरुभेदादयः (6) केषांचनमते विद्यमानाः शुष्क आशु व्यवायी विकासी सुगन्धदुर्गन्धगुणाः।

(23) गुर्वादिगुणयुक्तद्रव्याणां कर्माणि।

(24) परापरत्वादिसामान्यगुणानां उपयोगः महत्वं च।

(25) गुणप्राधान्यवादिमतम्।

(26) अथरसाः—(1) रसलक्षणम् (2) उत्पत्तिक्रमः (3) रसोत्पत्तौ भूतसंयोगः (4) रसस्य षट्त्वम् (5) रससंख्याविषये मतवैविध्यम् (7) रसानुरसलक्षणम् रसानांगुणत्वप्रतिपादनम् (8) रसानां शीतोष्णलघुगुरुरूक्षस्निग्धादि गुणेषु हीनाधिक्यं, (9) रसोपदेशेनसर्वद्रव्यमादिशेत (10) रसानां दोषजनकत्वशामकत्वं च (11) अत्र अपवादः (12) रसोपयोगः, क्रमः, (कफजादिव्याधौ) (13) रससंयोगकल्पना (त्रिषष्टिभेदाः) (14) रसतो द्रव्यगुणाः (15) रसाप्राधान्यंवादिमतम्।

(27) अथ विपाकः—(1) विपाकलक्षणम (2) पाकद्वैविध्यम् (अवस्थापाक निष्ठापाकौ जठरपाकः (3) विपाक विषयं मतवैविध्यम् (6) विपाक कर्माणि (तत्रापवादः) (5) विपाकस्य भूयिष्ठात्वं (6) विपाकः कदा उपलभ्यते (7) विपाक प्रधान्यवादिमतम्।

(28) अथ वीर्यम्—(1)वीर्यस्य लक्षणम् स्वरूपं च (2) द्विविधवीर्य—अष्टविधवीर्य—अनेकविधवीर्यवादः (3) वीर्यविज्ञाने उपायः (4) रसविपाकता वीर्यज्ञानम् (5) वीर्यकर्माणि (6) वीर्यप्राधान्यवादिमतम्, रसवीर्यविपाका शारीरकार्यक्षेत्रविभागः।

(29) अथ प्रभाव :—(1) प्रभावलक्षणम् (2) प्रभावस्य उदाहरणानि (3) प्रभावस्य अचिन्त्यता (4) विचित्रप्रत्ययारब्धत्वम् (5) प्रकृतिसमसंयोग—विकृतिविषमसंयोग—वशात्कर्मणि परिणामं च विचित्रता, सरादि प्रभावान्तानां गुणानां वलावलम् च।

(30) द्रव्यं कथं कार्यं करोति।

(31) सामान्यविशेषसिद्धान्तः।

(32) द्रव्योपयोगप्रकारोपायः।

(33) विविधभेषजकल्पनाहेतुः।

(34) ओषधिग्रहणकालः।

(35) अनुमानविषयः।

(36) उद्भिज्जद्रव्यसंग्रहायउचितः भूमिभागः कालश्च।

(37) उद्भिज्जद्रव्याणां उपादेयांगानि।

(38) कृताकृतभेषजद्रव्यसंरक्षणविधिः।

(39) द्रव्यसंग्रहकालः।

(40) अनुक्तलेशोक्तपरिभाषा।

(41) मानपरिभाषा (चरकमानं, सुश्रुतमानं—कालिंगमानं—मागधमानं—प्रचलित—भारतीय मानं—च)।

(42) उद्भिज्जद्रव्याणि—अधोनिर्दिष्टानाम् द्रव्याणाम् रसविपाकवीर्यप्रभावदोषघ्नत्व—रोगघ्नत्वादिसहितं, उपादेयांग—संग्रहणकाल—मात्रा—प्रमुख—कल्पोवृंहितम्—अयक्तोपयोगपरिणामतच्छमनोपायप्रतिनिधियुक्तं ।

उद्भिज्जद्रव्याणि—

| | | | | | |
|---|---|---|---|---|---|
| अगस्त्य | अपामार्ग | अश्वगंधा | आर्द्रक | उपकुंचिका | कट्फल |
| अगरु | अम्लवेतस | अश्वत्थ | आवर्तकी | उरुमाण | कंटकारी |
| अग्निमंथ | अम्लिका | अहिफेन | आवर्तनी | उशीर | कदली |
| अजगंधा | अरिगटक | आकारकरभ | इक्षु | एरंड | कपिकच्छु |
| अजमोदा | अर्क | आमलकी | इंगुदी | एरंडकर्कटी | |
| अतसी | अर्जुन | अम्लिका | इन्द्रवारुणी | एला | |
| अतिवला | अशोक | आम्रहरिद्रा | | ईश्वरी | कंकाल |
| अतिविषा | अश्मन्तक | आरग्वध | | उदुंबर | कटुतुंबी |

| | | | | |
|---|---|---|---|---|
| कपित्थ | कोकिलाक्ष | जीमूतक | नाडिहिंगु | |
| कमल | कोषातकी | जीवंती | नागवला | |
| कंपिल्ल | कृष्णजीरक | ज्योतिष्मती | नागवल्ली | |
| करवीर | कृष्णसारिवा | झंडू | पारिकेल | |
| करंज | खदिर | तगर | निंब | निंबूक |
| करीर | खर्जूर | तरुणी | निर्गुंडी | कर्कटशृंगी |
| कचूर | गांगेरुकी | ताड | नीलिनी | |
| कर्पूर | गिरिकर्णिका | तालीसपत्र | पटोल | |
| कलँवा | गुग्गुलु | तिल | पद्मक | |
| कलिहारी | गुंजा | कसेरुक | गुडूची | |
| तुरुष्क | परुषक | काकमाची | गोक्षुर | |
| तुलसी | पर्णवीज | काकोदुंवर | गोजिह्वा | |
| तुवरक | पर्पट | गोरक्षचिंचा | तेजोवती | |
| पलाण्डु | कांचनार | चक्रमर्द | त्रायमाणा | |
| पलाश | कारवेल्लक | चंदन | त्रिवृत् | |
| पाटला | कार्पासी | चंद्रशूर | त्वक् | |
| पाठा | कालमेघ | चंपक | दंती | |
| पातालगरुडी | कालादाना | चांगेरी | दमनक | |
| पाम्रन | काश्मरी | चालमोग्रा | दाडिम | |
| पारसीकयवानी | कासमर्द | चित्रक | दारुहरिद्रा | |
| पारिजातक | किराततिक्त | चुक्र | दूर्वा | |
| पारिभद्र (पांगारा) | कीटमारी | चोपचीनी | देवदारु | |
| पाषाणभेद | कीटमारीयवानी | छत्रक | द्राक्षा | |
| पिप्पली | कुंकुम | जटामांसी | द्रोणपुष्पी | |
| पिशाचकार्पास | कुटकी | जपा | धत्तूर | |
| पीलू | कुटज | जंबीर | धन्वन | |

| | | | |
|---|---|---|---|
| पुनर्नवा | कुंभारी | जंबू | धन्वयास |
| पुन्नाग | कुलंजन | जयपाल | धातकी |
| पूग | कुश | जलवेंतस | धान्यक |
| पूतिकरंज | कूष्मांड | जाती | धामार्गव |
| पूतिहा | कुष्ठ | जातीफल | नागकेशर |
| पृश्निपर्णी | केतकी | अतिविषा | प्रियंगु: |
| अतिविषा | प्रियंगु | प्रियाल | प्लक्ष |
| पनलगू | वकुल | वदर | बबूल |
| वला | वाकुची | विम्बी | विभीतक |
| विल्व | वाल | बृहती | बृहद्गोक्षुर |
| ब्राह्मी | भंगा | भव्य | भल्लातक |
| भारंगी | भीमसेनी कपूर | भूम्यामलकी | मुकूलक |
| | मंजिष्ठा मण्डूकपर्णी | मदन | मदयंतिका |
| मधूक | मरीच | मरूषक | मल्लिका |
| महानिंब | महाबला | मातुलुंग | मानकंद |
| मायाफल | मार्कण्डी | मांसरोहिणी | माषपर्णी |
| मिश्रेया | मिष्ठनिंबू | मुंजातक | मुंडी |
| मुद्गपर्णी | मुसली | मुस्ता | मूर्वा |
| मूलक | मेथिका | मैंदालकड़ी | यव |
| यवानी | यष्टीमधु | रक्तचंदन | रसोन |
| राजिका | रेवंदचीनी | रोहितक | रोहीष |
| लज्जालु | लताकस्तूरिका | लवंग | लोणिका |
| लोध्र | वचा | वज्रवल्ली | वट |
| वत्सनाभ | वनजीरक | वनवृंताक | वरुण |
| वंश | वाताम | वासा | वाराहीकन्द |
| विडंग | विदारी | विषतिंदुक | वेतस |
| वृक्षादनी | वृक्षाम्ल | वृद्धदारुक | सप्तचक्री |
| सप्तपर्ण | सरल | सर्ज | सर्पगन्धा |
| सर्पण | सातला | सारिवा | सीताफल |
| सुदाव (सताप) | सूरण | सुरंजान | स्नुही |
| स्वर्णक्षीरी | शंखपुष्पी | शटी | शतपुष्पा |
| शरपुंखा | शल्लकी | शाकवृक्ष | शाखोटक |
| शाल | शालपर्णी | शाल्मली | शिरीष |
| शिंशिपा | शुंठी | शैलेय | शोभांजन |
| शृंगाटक | श्योनाक | श्लेष्मातक | श्वेतजीरक |
| श्वेतमुसली | हपुषा | हरिद्रा | हरीतकी |
| हंसपदी | हिंगु | हिज्जल | |
| हैमवतीवचा | हृद्धात्री (हियाचली) | (समुद्रफल) | |

(43) विषोपविषाणाम् शुद्धि प्रकार :—

वत्सनाभ — धत्तूर — विषमुष्टि — जयपाल — अहिफेन — भंगा — करवीर — कलिहारी — गुंजा — प्रभृति — विषोपविषाणाम् शुद्धिः कयारीत्या किमर्थं च क्रियते इति ज्ञानम् ।

(44) द्रव्यगुणशास्त्रविषयकं यत् तत्वज्ञानं तस्य सोदाहरणप्रतिपादनार्थं अग्रे निर्दिष्टानाम् द्रव्याणाम् सविस्तरम् संपूर्ण ज्ञानम् मार्मिकतया सविशेषं संपादनीयम् ।

हरीतकी — आमलकी — लशुन — गुडूची — पुनर्नवा — गोक्षुरु — कंटकारी — यष्टिमधु — वत्सनाभ — भल्लातक — गुग्गुलु — अर्क — चित्रक — कुमारी — शतावरी — पर्पट — खदिर — भंगा — कटुकी — पिप्पली — यवक्षार — कुटज — विषतिंदुक — सारिवा — हरिद्रा — शंखपुष्पी ।

(45) पुरोनिर्दिष्टानाम् द्रव्याणां प्रत्यक्षाभिज्ञानम् केवलं उल्लिखतांशेन संपादनीयम्

मूल—वत्सनाभ — अतिविषा — दारुहरिद्रा — यष्टिमधु — मंजिष्ठा — आकारकरभ — वचा — जटामांसी — चित्रक — सर्पगंधा — कुटकी — शतावरी — मुसली — मुस्ता, — उशीर — सप्तचक्रा — दशमूलद्रव्याणि च ।

कंद—शृंगाटक — हरिद्रा — वाराहिकन्द — विदारीकन्द — मुस्ता — पलाण्डु — कर्चुर खण्ड) शुण्ठी — रसोन — चोपचीनी ।

कांड—गुडूची — दारुहरिद्रा — यष्टिमधु — रक्तचंदन — मंजिष्ठा — वचा — आकारकरभ — स्नुहि — सप्तचक्रा — चंदन — देवदारु — किराततिक्त ।

पत्र—गुडूची — वरुण — कार्पासी — कांचनार — शिरीष — शाल्मली — विल्व — शोभांजन — निंव — पलाश — मेथिका — अम्लिका — जंबू — दाडिम — करवीर — वासा — भृंगराज — तुलसी — निर्गुंडी — वट उदुम्बर — प्लक्ष — अश्वत्थ — मधुक — पारिजात — अर्जक — भंगा — एरंड — तालीस — तमाल — जातीपत्र ।

पुष्प—शिरीष — धातकी — कमल — गोरखमुंडी — वव्वुल — करवीर — वासा — तुलसी — अर्क — मधूक — धत्तूर — गंजा — जपा — चंपक — शतपत्री, झण्डू, अगस्त्य ।

फल—कार्पासी — जंवीर — निंबुक — विल्व — कपित्थ — मातुलुंग — शिरीष — निंवुक — विल्व — कपित्थ — इंगुदि — द्राक्षा — अरिष्टक — भल्लातक — प्रियाल — शोभाजन — करंज — अम्लिका — दाडिम — पूतिकरंज — इंद्रवारुणी — कटुतुंवी — पटोल — कूष्मांड — मदन — विडंग — विषतिंदुक — जातीफल — आमलकी — हरीतकी — विभीतक — उदुंवर — एला — कंपिल्लक — आरग्वध — सातला — मरिच — हरड — जयपाल — पिप्पली — वट — वाताद ।

बीज—वाकुची — जीरक — यवानी — धान्यक — अजमोदा — विडंग — शिरीष — अतसी — करंज — पलाश — गुंजा — मेथिका — पारसीकयवानी— जयपाल — एरंड — कीटमारीयवानी, अपामार्ग ।

प्ररोह—वट, आम्र, जम्बू, दूर्वा, वंश ।

केसर—नागकेसर—कुंकुम—पद्म, शतपत्री ।

क्षुप—स्वर्णक्षीरी — पर्पट — शरपुंखा — चक्रमर्द — लज्जालु — बला — गोक्षुरु — धन्वयास — चांगेरी — ब्राह्मी — दमनक — भूनिबं — कंटकारी — इक्षुरक — पुनर्नवा — अपामार्ग — भूम्यामली – कुमारी — दूर्वा — वनप्सा, शंखपुष्पी ।

त्वक्—कुटज — त्वक् — कट्फल — निम्ब, शोभाजन, पंचक्षीरित्वक् ।

ग्रंथांशा:—मदनपालनिघंटु: संपूर्ण: ।

वाग्भट सूत्रस्थानम् 5–6–9–10–15 ।

चरक—सूत्रस्थानम् 1–4–25–26–27 ।

सुश्रुत-सूत्रस्थानम् 40–41–42–45–46 ।

भावप्रकाशान्तर्गतनिघंटुभाग: समग्र: ।

द्रव्यगुणविज्ञानम्, अनुक्तौषधिवर्गश्च परिभाषा प्रकरणसमेत: ।

# (४) रसशास्त्रम्

## १५० व्याख्यानानि

## ७५ प्रात्यक्षिकाणि

(1) रसा: (2) उपरसा: (3) साधारणरसा: (4) रसोपरससाधारणरसानां स्वरूप विशेष: (5) रसोपरससाधारणरसानां शोधनम् (6) रसोपरसादीनां (7) शोधनमारणादीनां परिणामा: (8) स्वर्णादिलोहानां शोधन-मारण-प्रकारा: स्वरुपंच (9) पारदसंस्कारा: तेषां स्वरुपंच (10) अष्टादश संख्यकानां पंचविंशति संख्यकानां च रस बंधानां स्वरुप-परिणाम-विशेषा: (19) तेषां स्पष्टीकरणम् (12) अधोनिर्दिष्टानां द्रव्याणां शोधन मारणादिप्रकारा अवगन्तव्या: सत्वपातन प्रकाराश्च यथासमेतम् ।

(1) अभ्रकं (2) वैक्रान्ता: (3) माक्षीक (4) विमल: (5) शिलाजतु (6) सस्यकं (7) चपल: (8) रसक: (9) गंधक: (10) गैरिकं (11) कासीसं (12) कांक्षी (13) तालकं (14) मन:शिला (15) अंजनं (16) कंकुष्ठम् (17) कंपिल्ल: (18) गौरीपाषाण: (19) नवसादर: (20) कपर्द: (21) अग्निजार: (22) गिरिसिंदूरम् (23) हिंगुल: (24) मृद्दारश्रृंगं (25) राजावर्त: (26) माणिका (27) मुक्ता (28) प्रवाल: (29) शंख: (30) शुक्ति: (31) पुरवराज: (32) मरकतम् (33) वज्रम् (34) नीलमणि (35) गोमेदमणि: (36) वैडूर्यम् (37) सूर्यकान्त: 38) चन्द्रकान्त: (39) सुवर्णम् (40) रजतम् महारजतम् (41) ताम्रम् (42) लोहम् (43) कांतलोहम (44) लोहकिट्टं (45) नागं (46) वंगं (47) पित्तलम् (48) कांस्यं (49) वर्तलोहं (50) यशदम् (51) टंकण: (52) समुद्रफेनम् (53) सुधापाषाण: (54) सोरक: (55) खटिका (56) शंखजीरकं, अकीक:, तंतुपाषाण: गोदन्ती ।

(13) रससिद्धिसाधनानां यन्त्राणां मूषाणांच स्वरूपं निर्माणविधयश्च ।

(14) पुटांना स्वरूपम् प्रकाराश्च ।

(15) परिभाषा ज्ञानम् ।

(16) रसरसायनादिकल्पानां निर्माणविधय: तेषां गुणविशेषाश्च ।

(1) रससिंदूर: (2) चन्द्रोदय: (3) हेमगर्भ: (4) सूतशेखर: (5) मल्लसिंदूर (6) रसकर्पूर: (7) समीरपन्नग: (8) सुवर्णराजवंगेश्वर: (9) अग्निकुमार: (10) आनन्दभैरव: (11) इच्छाभेदीरस: (12) एकांगवीर: (13) कनकसुंदर: (14) कामदुधा (15) कालकूटरस: (16) कृमिकुठार: (17) क्रव्यादरस:, कल्पतरुरस: (18) गुल्मकालानलरस: (19) गंधकरसायनम् (20) ग्रहणीकपाटरस: ग्रहणीगजकेसरी (21) ज्वरांकुश: (22) ताम्र-पर्पटी (24) पंचामृतपर्पटी (25) त्रिभुवनकीर्त्ति: (26) प्रतापलंकेश्वर: (27) प्रवालपंचामृताख्योरस: (28) बोलवद्ध: (29) मृत्युंजय: (30)

महामृत्युंजयः (31) मेहान्तकः (32) राजचंडेश्वरः (33) रसपर्पटी (34) राजमृगांकः (35) लघुमालिनीवसंतः (36) सुवर्णमालिनीवसंतः (37) लोकनाथः (38) लक्ष्मीविलासः (39) वातविध्वंसः (40) वसंतकुसुमाकरः (41) विश्वतापहरणः (42) शीतांकुशः (43) शूलकुमारः शूलनिर्मूलनरसः (44) शोथारिः (45) शंखवटी (46) आरोग्यवर्धिनी (47) श्वासकुठारः (48) सन्निपातभैरवः (49) सिंदूरभूषणः (50) स्वर्णपर्पटी (51) चंद्रप्रभागुटिका (52) सूतिकाभरणः (43) स्मृतिसागरः (53) हेमाभ्रकर-रसिंदूरः (55) योगराजगुग्गुलः (56) संजीवनीगुटिका (57) जलोदरारिः (58) नाराचरसः नारायणरसः, नयनचन्द्रलौहम् सप्तामृतलौहम् ।

ग्रन्थांशाः—

रसेन्द्रचूडामणिः ।
रसरत्नसमुच्चयः पूर्वखंड ।
आयुर्वेदप्रकाशः ।
शार्ङ्गधरसंहिता ।
योगरत्नाकरः ।
रसतरंगिणी ।
रसामृतम् ।

आलोच्यग्रंथः—

रसेन्द्र सारसंग्रहः, रसहृदयतन्त्रम्, रसोपनिषद् ।

रसशास्त्र औषधिनिर्माणम् च

पंचविधकषायाः—स्वरसाः (आर्द्रकं, तुलसी, वासा)
क्वाथाः (भूनिम्बादिः पुनर्नवादिः तिक्तापंचकः अभयादिः रास्नादिः मंजिष्ठादिः) ।
कल्कः (शुंठीकल्कः, निम्बकल्कः, लशुनकल्कः महानिम्बजटाकल्कः ।
हिमः (धान्यकादिः, पर्पटादिः) श्लेष्मादि (चाय) फाण्टकम् ।
फांटः (नरसिंहचूर्णम्, सितोपलादिचूर्णम्, हिंग्वष्टकम्) भास्करलवणम् ।
पुटपाकः (वासापुटपाकः, शुंठीपुटपाकः मृगशृंगपुटपाकः) कुटजपुटपाकः ।
वटकाः (मंडूरवटकाः, चंद्रप्रभा, योगराजगुग्गुलः संजीवनी) क्षारवटकाः ।
क्षीरपाकाः (अर्जुनक्षीरपाकः, शुंठीक्षीरपाकः) पञ्चमलक्षीरपाकः ।
स्नेहपाकः (शोधनतैलम् रोपणतैलम्, दाडिमघृतम्) त्रिफलाघृतम् ।
अवलेहः (च्यवनप्राशावलेहः, वासावलेहः, दाडिमावलेहः) ब्राह्मीघृतम् कुटजावलेह अमृत-प्राशघृतम् ।
आसवारिष्टे (कुटजारिष्टम्, द्राक्षासवः, उशीरासवः) कनकासवः ।
शुक्तसौवीरम् (कस्यापि धान्यस्य जम्बुफलशुक्तं च) ।
वर्तिः (चन्द्रोदया वर्तिः, फलवर्तिः, गुदवर्तिः) दन्तवर्तिः ।
रसक्रिया (यष्टीमधुरसक्रिया, बब्बुलरसक्रिया, गुडूचीघनसारः ) ।
सत्वम् (गुडूचीसत्वम्) आर्द्रकसत्वम्, गोधूमसत्वम् ।
अर्कः (शतपुष्पार्कः) दशमूलार्क, गुलावअर्कः, पोदीनार्कः ।

पाकाः (कूष्मांडपाकः, एरंडपाकः) सौभाग्यशुण्ठीपाकः, पूगीपाकः ।

यवागुयूषकल्पनामन्थः (खर्जूरमंथः) ।

क्षारः (अपामार्गस्य, कदल्याः, अर्कस्य) यवक्षारम् सर्जिक्षारम् ।

लेपः (दशांगलेपः बिडालकलेपः) ।

उपनाहः (अतसी-गोधूमादिः) शाल्वणोपनाहः ।

मलहरम् (सिंदूरमलहम्, गंधकमलहरम्) पारदादि मलहरम् ।

एतेषां निर्माणविधौ प्रत्यक्षप्रयोगप्रसंगे कानि साधनानि कानि च उपकरणानि आवश्यकानि, कियांश्चकालः अपेक्ष्यते, अवस्थान्तरं कथं जायते, तत्र किंविशेषतया लक्ष्यीकरणीयं तेषां पक्वापक्वानां परीक्षा मात्रा प्रभृति सविस्तरं सप्रयोगं अनुष्ठेयम् ।

ग्रंथांशः—वाग्भट-कल्पस्थनम् अ. 6 सूत्र अ. 30 ।

चरक-सूत्रस्थानम्—अ. 4 कल्पस्थानम्, अ. 41 कल्पस्थानम् अ. 12 ।

सुश्रुत—चिकित्सास्थानम्—अ. 31 ।

शाङ्गंधर संहिता—मध्यमखंड संपूर्णम् ।

द्रव्यगुणपरिभाषा प्रकरणं यादवजीकृतम् च ।

# (५) स्वस्थ-वृत्तम्

## १०० व्याख्यानानि

(1) स्वास्थ्यस्वरुपं (2) स्वास्थ्यसंरक्षणार्थं उचिता दिनचर्या (3) ऋतुचर्या (4) ऋत्वनुसारेण आहारादिस्वरूपं (5) निवासस्थानादिविचारः (6) दिनचर्यायाः विशेषण विज्ञेयाः अंशाः।

(1) मलमूत्रोत्सर्जनम् (2) मुखदन्तधावनम् (3) गंडूषाः (4) अवजनम् (5) नस्य-विचारः (6) धूमपानविचारः (6) ताम्बूलभक्षणविचारः (8) अभ्यंगः (9) व्यायामः (10) स्नानं (11) आहारविधिः (12) आहारकालः (13) आहारमात्रा (14) उद्वर्तनानुलेपनादि-विचारः (15) अंगमर्दनम् (16) आहारद्रव्याणि (17) आहारद्रव्यसंस्काराः (18) आहार द्रव्यं मिश्रविचारः (19) विरुद्धाशनं तज्जन्याविकाराश्च (20) पेयद्रव्य विचारः (21) अनुपानविचारः (22) निद्राविचारः (23) निद्राकालः (24) निद्राप्रमाणम् (25) दिवा स्वापः (26) निद्रानाशकरा आहार विहाराः (27) सुखनिद्राकरा आहारविहाराः (28) ब्रह्मचर्यम् (29) व्यवायार्ह वयः (30) पुरुषाणां च स्त्रीणां च व्यवायमर्यादा (31) व्यवाय संबंधिनो नियमाः (32) व्यवायस्य उचिता अनुचिता च स्त्रीपुंसोः शरीरावस्था (33) वृष्य योगानां हिताहितत्वम् (34) नपुंसकप्रकाराः सहजा जातोत्तरकालजाश्च (35) स्त्रीपुंसां च नपुंसकत्वलक्षणानि '36) नपुंसकचिकित्सा ।

7. निवासस्थानादिविचारः—

(3) निवासस्थानाम् (2) नगरग्रामादीनां रचनाविशेषविचारः (3) जलमलादि-निर्हरणविचारः (4) व्यवसायस्थानविचारः (5) क्रीडास्थानविचारः (6) शिक्षास्थानविचारः (7) पानीयजलशोधनम् (8) तत्प्रकाराश्च ।

8. सद्वृत्तम्—

(1) शरीरेन्द्रियाणां निर्मलत्वं शुचित्वं सम्यक् युक्तत्वं च (2) वेषभूषा च (3) दंडआतपत्रउपानद् धारणानि (4) भाषण गमन मैत्री प्रभृतिषु समीचीना पद्धतिः (5) पूज्यापूज्यभावेषु कथं वर्तितव्यम् (6) सात्म्या-सात्म्यविवेकः (7) साहसपरिवर्जनादि (8) परैःसह कथं वर्तितव्यम् (9) आचार्यः सर्व-चेष्टासु लोकएवेति विचयः।

### जनपदोदध्वंसनम्

1. पानीयविचारः (1) जनपदस्य तोयसंचयः कूपतडागनदीनिर्झरादयः (2) तोय-संचयानां दुष्टिः कथं संभवति (3) तोयदुष्टिस्तोयजन्या विकाराः तेषां प्रतिबंधश्च (4) तोयदुष्टिलक्षणानि (5) तोयशुद्ध्युपायाः (6) शुद्धतोयस्य लक्षणम् (7) शुद्धतोयस्य गुणाः (8) गृहकर्मणि जनपदस्यार्थे च तोयस्य उपयोगः (9) पान—स्नान—वस्त्रधावन—संमार्जनादिषु तोयस्य महत्वम् ।

2. वायुविचारः — (1) वायोःप्राणधारकत्वं महत्वं चवायोर्दुष्टिः कैः कैः कारणैर्भवति (दुर्गन्धधूलिधूमविषद्रव्यसंपर्कादिभि वायुर्दुष्टि (3) दुष्टवायुलक्षणानि (4) दुष्टवायुना पुरुषे जनपदे च के के विकारा भवन्ति (5) वायुशुद्धिः कथं कर्तव्या ।

3. भूमिविचारः — (भूमिप्रविभागीयम्) (1) मृद्वी, समा, स्थिरा, सिकतादिभिः– अनुपहताभूमिः गुणवती (2) भूमिदोषाः दुष्टप्राणिमक्षिकादिभिः आक्रान्तत्वम् (जनपदोध्वंसनीये चरकनिर्दिष्टा दशदोषाः) (3) (3) दुष्टाभूमिः कान्विकारान् जनयति (4) भूमिदोषजातं उपायाः देशवर्जनं शुद्धचादि ।

4. देशविचारः — (1) जांगलः आनूपः साधारणः इति त्रिविधो देशः (2) शीतवर्षोष्णमारुतानां समत्वात् समोदेशः आरोग्यप्रदः (3) आनूपे कफविकारः जांगले वातपित्तविकारा भवन्ति (4) देशे विविधदिशाभ्यः आगतानां मारुतानां परिणामाः (5) पर्जन्यस्य सूर्योष्मणश्च देशे परिणामः (6) देशसात्म्यम् ।

5. गृहविचारः — (1) गृहार्कभूमिपरीक्षा (भूमिदेशप्रकरणादितः) (2) आरोग्यार्थम् गृहनिर्माणम् औपसर्गिका रोगाः (जानपदोध्वंसनाः) ।

(1) उदकवायुदेशकालदोषैः जानपदा दोषा भवन्ति (2) ज्वरशोषकुष्ठनेत्राभिष्यन्दादीनां औपसर्गिकत्वम् (3) निःश्वासवस्त्र सहशय्यासनादिभिः रोगाः संक्रामंति (4) उदकादीनां शुद्धिः जानपदिकरोगानुत्पादनार्थं कर्तव्यादि (5) स्वस्थवृत्तोक्तनियमाः धर्माचाराः रोगानुत्पादनार्थं कर्तव्याः (6) युद्धनिमित्तकोऽपि जनपदोध्वंसः अधर्ममूल एव (7) कालाकालं मृत्युविज्ञानम् ।

### रोगानुत्पादनम्

(1) वेगान्नधारयेत् (वातविण्मूत्रादीन्त्रयोदश) (2) वेगधारणजा रोगाः तेषां चिकित्सा च (3) वेगधारणजानां रोगाणां साध्यासाध्यलक्षणम् (4) वेगधारणम् वायुप्रकोपः तस्य साधनं च (5) संशोधनशुद्धानां मलानां पुनरुद्भवो न भवति (8) कालविद्वृष्ययोगान् रसायनानि च गृह्णीयात् (9) नित्यं हिताहारविहारसेवनादिकं कुर्यात् (10) मनसः समाहितत्वार्थं यतेत (11) साहसपरिवर्जनं कुर्यात् (16) आहार शयन ब्रह्मचर्याणां युक्ततया योजनम् च ।

ग्रंथांशाः—चरक—सूत्र अध्याय 5, 6, 7, 8, 19–21-27
चरक—विमानस्थान अध्याय 1, 2, 3 ।
सुश्रुत सूत्र अध्याय 6, 20, 45, 46 ।
सुश्रुत चिकित्सा अध्याय 24, 26 ।
सुश्रुत चिकित्सा अध्याय 55, 60 ।
वाग्भट सूत्र अध्याय 2, 3, 4, 5, 6, 7 ।
स्वस्थवृतसमुच्चयः राजेश्वर शास्त्रिकृतः ।

# रोगनिदानम् कायचिकित्सा च

रोगाणां प्रागुत्पत्तिक्रमः दर्शनादित्रिविधपरीक्षा—आप्तोपदेशादि—त्रिविधपरीक्षा नाड़ी-मूत्रादि अष्टविधपरीक्षा—रोगव्यवच्छेदकतत्वनिरूपणम् किनाम चिकित्सा—चिकित्सापादाः—चिकित्सातत्वनिरूपणम् व्याधिप्रतीकारसूत्राणि विकारानुत्पत्ति चिकित्सा—विकारप्रशमनचिकित्सा द्विविधोपक्रमः, षड्विधोपक्रमः। वातपित्तकफानां चिकित्सा—दोषधातुमलानां वृद्धिक्षयचिकित्सा-सूत्राणि तिर्यग्गतदोषचिकित्सासूत्रम्, अन्यस्थानगतस्य दोषस्य प्रतीकारः संसर्गसंनिपातयोः चिकित्सा, संचये दोषापहरणं गुणाः, शाखास्थितेदोषाणां कोष्ठाभिगमनम्।

पंचकर्मचिकित्साविवरणम्, पंचकर्मातियोगे विकारप्रशमः, उपकल्पनीयानि द्रव्याणि स्नेह-स्वेदविधिः वमनविरेचनविधिः, संसर्जनक्रमः शोधनस्य गुणाः शमनस्य निरुपणम् शुद्धिचिकित्सा-प्रयोगलक्षणम् दोषाणां लिंगैर्व्याध्युपचारः दोषव्याधि उभयप्रत्यनीक—चिकित्सानिरूपणम् हेतु-विपरीतर्थकारि चिकित्सायाउदाहरणानि।

जनपदोवंध्वसंसाधारणी चिकित्सा ऋतुव्यापदां चिकित्सासूत्रम् दुष्टस्त्रोतसां चिकित्सासूत्राणि सप्रधानदोष रोगचिकित्सा रक्तजरोगः—चिकित्सासूत्रम् च, स्थौल्यकार्श्यचिकित्सा।

चिकित्सायां दूष्यदेशादिविचारः उपद्रवे कथं चिकित्सेत।
इन्द्रियोपक्रमः—मानसव्याधिचिकित्सासूत्रम्।
विविधं औषधं चिकित्साकल्पविवरणम् सिद्धौषधिचिकित्सातत्त्वम्।
रसायनचिकित्सा (प्रकारपथ्यादिसहिता) बाजीकरण चिकित्सा।
औषधकालः औषधमात्रा औषधानुपानम्—पथ्यापथ्यविचारः।
अधोनिर्दिष्टानां व्याधीनां हेतु—पूर्वरुपाणि रूपं उपशयसंप्राप्तिः।
उपद्रव साध्यासाध्यत्वम्—रिष्टलक्षणम्, व्याध्यवस्था—रोगव्यवच्छेदकपूर्वकं।
संपूर्णनिदानम् सामान्यविशेष—स्नेहस्वेदशोधनशमनरसायनादिरूपा।
मात्राकालानुपानसहिता पथ्यापथ्यसहिता संपूर्ण चिकित्सा।

| | | | |
|---|---|---|---|
| अर्शः | अग्निमांद्यम् | अजीर्णम् | भुक्तरोगाः |
| विषूचिका | अलसकः | विलंबिका | कृमिरोगाः |
| उदावर्तम् | आनाहः | हलीमकः | रक्तपित्तम् |
| कुष्ठम् | रोमांतिका | उरःक्षतम् | नासारोगाः |
| मूर्च्छा | संन्यासः | तृष्णा | कोठः |
| आमवातः | प्रमेहः | अपची | वृद्धिः |
| वातरक्तम् | विसर्पः | शीतला | क्षीणः |
| क्लीवत्वम् | गुल्मः | पांडुरोगः | अरुचिः |
| श्वासः | भ्रमः | उन्मादः | दाहः |
| अम्लपित्तम् | मूत्रकृच्छ्रम् | मेदोरोगः | ग्रंथिः |
| अंतर्विद्रधिः | शूलम् | कामला | छर्दिः |
| शोथः | विस्फोटः | फिरंगः | कासः |
| स्वरभेदः | निद्रा | अपस्मारः | शीतपित्तम् |

| | | | |
|---|---|---|---|
| वातव्याधि: | मूत्राघात: | गलगंड: | अर्बुदम् |
| क्षुद्ररोगा: | उदरम् | कुंभकामला | हृद्रोग: |
| उपदंश: | मसूरिका | राजयक्ष्मा | हिक्का |
| शिरोरोगा: | तंद्रा | मदात्यय: | उदर्द: |
| ऊरुस्तंभ: | अश्मरी | गंडमाला | श्लीपदम् |
| स्नायुक: | | | |

बालापचरणम्—बालरोग विज्ञानम् बालामयप्रतिषेधश्च रसायनवाजीकरणचिकित्सा-विशेषा:

(1) दोषज: कर्मज: दोषकर्मजश्चेति; त्रिविधव्याधिविज्ञानम्।

(2) कर्मजादिव्याध्यो: बलिमंगलहोमादिचिकित्सा।

(3) सर्वव्याधिषु मन:शान्तिरूपा चिकित्सा।

ग्रंथांशा:—(1) चरक:—सूत्रस्थानम्—अ. 1, 2, 3, 9, 10, 13, 14, 15, 16, 21, 22, 23, 29, 30।
चिकित्सास्थानम्—अ. 1, त: 20, 22, 24, 27, 28, 29।
विमानस्थानम्—उपयोगिनोंशा:।
कल्पस्थानम्—समग्रम्।
सिद्धिस्थानम्—समग्रम्।

(2) सुश्रत:—सूत्रस्थानम्—अ. 43, 44।
चिकित्सास्थानम्—अ. 4, 5, 7, 9, 11, 12, 13, 14, 19, 20, 21, 26, 30, 30 ते 40।
उत्तरस्थानम् 26, 29, 40 ते 56।

(3) वाग्भट:—चिकित्सास्थानम्—अ. 2 तै 12-14 तै 22।
शारीरस्थानम्—अ. 1–2।
उत्तरस्थानम्—अ. 1, 2, 32, 33, 34, 39, 40।

(3) योगरत्नाकर:—चिकित्साविभाग: सिद्धान्तनिदानंच।

(5) भावप्रकाश:—चिकित्साविभाग:।

# (७) शल्यं–शालाक्यतंत्रम् च

## व्याख्यानानि २००

## प्रात्यक्षिकाणि १००

